# ॥श्री श्री गोपाल सहस्रनाम स्तोत्रम्॥

श्री पार्वत्युवाच

कैलासशिखरे रम्ये गौरी पृच्छति शंकरम्।

ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः॥ १॥

त्वमेव पूज्यसे लोकैर्ब्रह्म-विष्णु-सुरादिभिः।

नित्यं पथसि देवेश कस्य स्तोत्त्रं महेश्वरम्॥ २॥

आश्चर्यमिदमत्यन्तं जायते मम शंकर।

तत् प्राणेश महाप्राज्ञ संशयं छिन्दि मे प्रभो॥ ३॥

श्री महादेव उवाच

धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे।

रहस्यातिरहस्यञ्च यत् पृच्छति वरानने॥ ४॥

स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि।

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः॥ ५॥

दत्त्वे च सिद्धिहानिः स्यात्तस्माद् यत्नेन गोपयेत्।

इदं रहस्यं परमं पुरूषार्थ-प्रदायकम्॥ ६॥

धनरत्नौघ-माणिक्य-तुरंगम-गजादिकम्।

ददाति स्मरणादेव महामोक्ष-प्रदायकम्॥ ७॥

तत्तेऽहं संप्रवक्षामि शृणुष्वावहिता प्रिये।
यौऽसौ निरञ्जनो देवश्चित्स्वरूपी जनार्दनः॥८॥
संसार-सागरोत्तारकरणाय सदा नृणाम्।
श्रीरंगादिकरूपेण त्रैलोक्यं वाप्य तिष्ठति॥९॥
ततो लोका महामूढा विष्णुभक्ति-विवर्जिताः।
निश्चयं नाधिगच्छन्ति पुनर्नारायणो हरिः॥१०॥
निरञ्जनो निराकारो भक्तानां प्रीतिकामदः।
वृन्दावन-विहाराय गोपालं रूपमुद्वहन्॥११॥
मुरलीवादनाधारी राधायै प्रीतिमावहन्।
अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः॥१२॥
श्रीकृष्णचन्द्रो भगवान् नन्दगोपवरोद्यतः।
धरणी रूपिणी माता यशोदानन्ददायिनी॥१३॥
द्वाभ्यां प्रयाचितो नाथो देवक्यां वसुदेवतः।
ब्रह्मणाभ्यर्थितो देवो देवैरपि सुरेश्वरि॥१४॥
जातोऽवन्यां मुकुन्दोऽपि मुरली वेदरेचिका।
तया सार्धं वचः कृत्वा ततो जातो महीतले॥१५॥
संसारसारसर्वस्वं श्यामलं महदुज्वलम्।
एतज्ज्योतिरहं वेद्यं चिन्तयामि सनातनम्॥१६॥
गौरतेजो विना यस्तु श्यामतेजः समर्चयेत्।
जपेद्वा ध्यायते वापि स भवेत् पातकी शिवे॥१७॥

स ब्रह्महा सुरापी च स्वर्णस्तेयी च पञ्चमः।
एतैर्दोषैर्विलिप्येत तेजोभेदान्महेश्वरि॥ १८॥
तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकं।
तस्मादिदं महादेवि गोपालेनैव भाषितम्॥ १९॥
दुर्वाससो मुनेर्मोहे कार्त्तिक्यां रासमण्डले।
ततः पृष्ठवती राधा सन्देहं भेदमात्मनः॥ २०॥
निरञ्जनात् समुत्पन्नं मयाधीतं जगन्मयि।
श्री कृष्णेन ततः प्रोक्तं राधायै नारदाय च॥ २१॥
ततो नारदतः सर्वं विरला वैष्णवास्तथा।
कलौ जानन्ति देवेशि गोपनीयं प्रयत्नतः॥ २२॥
शठाय कृपणायाथ दाम्भिकाय सुरेश्वरि।
ब्रह्महत्यामवाप्नोति तस्माद् यत्नेन गोपयेत्॥ २३॥

अथ ऋष्यादिस्मरणम्॥

अथ श्री गोपाल सहस्रनामस्तोत्रमन्त्रस्य श्री नारद ऋषिः। अनुष्टुप्-छन्दः। श्री गोपालो देवता। काम वीजम्। माया शक्तिः। चन्द्रः कीलकम्। श्री कृष्णचन्द्र-भक्तिरूप-फलप्राप्तये श्री गोपालसहस्रनामजपे विनियोगः॥

अथवा।

ॐ ऐं क्लीं वीजम्। श्रीं ह्रीं शक्तिः। श्री वृन्दावननिवासः कीलकम्। श्री राधाप्रियं परं ब्रह्मेति मन्त्रः। धर्मादिचतुर्विध-पुरुषार्थ-सिद्ध्यर्थे जपे विनियोगः॥

अथ ऋष्यादि न्यासः।

शिरसि ॐ नारदऋषये नमः। मुखे ॐ अनुष्टुप् छन्दसे नमः। हृदये ॐ श्री गोपालदेवतायै नमः। गुह्ये क्लीं वीजाय नमः। पादयोः ह्रीं शक्तये नमः। सर्वांगे चन्द्राय कीलकाय नमः॥

अथ करन्यासः।

ॐ क्लां अंगुष्ठाभ्यां नमः। ॐ क्लीं तर्जनीभ्यां स्वाहा। ॐ क्लूं मध्यमाभ्यां बषट्। ॐ क्लैं अनामिकाभ्यां हुँ। ॐ क्लौं कनिष्ठाभ्यां वौषट्। ॐ क्लः करतलपृष्ठाभ्यां अस्त्राय फट्॥

अथ अंगन्यासः।

ॐ क्लां हृदयाय नमः। ॐ क्लीं शिरसे स्वाहा। ॐ क्लूं सिखायै वषट्। ॐ क्लैं कवचाय हुँ। ॐ क्लौं नेत्राभ्यां वौषट्। ॐ क्लः करतलपृष्ठाभ्यां अस्त्राय फट्॥

अथ मूलमन्त्र-न्यासः।

क्लीं अंगुष्ठाभ्यां नमः। कृष्णाय तर्जनीभ्यं स्वाहा। गोविन्दाय मध्यमाभ्यां वषट्। गोपीजन अनामिकाभ्यां हुँ। वल्लभाय कनिष्ठाभ्यां वौषट्। स्वाहा करतलपृष्ठाभ्यां अस्त्राय फट्॥ इति करन्यासः॥

क्लीं हृदयाय नमः। कृष्णाय सिरसे स्वाहा। गोविन्दाय शिखायै वषट्। गोपीजन कवचाय हुँ। वल्लभाय नेत्राभ्यां वौषट्। स्वाहा करतलपृष्ठाभ्यां अस्त्राय फट्॥ इति हृदयादि न्यासः॥

अथ ध्यानम्॥

कस्तुरीतिलकं ललाटपटले वक्षस्थले कौस्तुभं
नासाग्रे वरमौक्तिकं करतले वेणुः करे कंकणम्।
सर्वांगे हरिचन्दनं सुललितं कण्ठे च मुक्तावलि-
र्गोपस्त्री परिवेष्टितो विजयते गोपालचूडामणिः॥

फुल्लेन्दीवरकान्तिमिन्दुवदनं वर्हावतंसप्रियं
श्रीवत्सांकमुदारकौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपीनां नयनोत्पलार्चिततनुं गो-गोपसंगावृतं
गोविन्दं कलवेणुवादनपरं दिव्यांगभूषं भजे॥

अथ सहस्रनामस्तोत्रम्॥

ॐ क्लीं देवः कामदेवः कामवीजसिरोमणिः।
श्रीगोपालो महीपालः सर्ववेदान्तपारगः॥ १॥
धरणीपालको धन्यः पुण्डरीकः सनातनः।
गोपतिर्भूपतिः शास्ता प्रहर्ता विस्वतोमुखः॥ २॥
आदिकर्ता महाकर्ता महाकालः प्रतापवान्।
जगज्जीवो जगद्धाता जगत्भर्ता जगद्वपुः॥ ३॥
मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान्।
नारायणो हृषीकेशो गोविन्दो गरुडध्वज॥ ४॥
गोकुलेन्द्रो महाचन्द्रः शर्वरीप्रियकारकः।
कमलामुखलोलाक्षः पुण्डरीकः शुभावहः॥ ५॥
दुर्वासाः कपिलो भौमः सिन्धुसागरसंगमः।
गोविन्दो गोपतिर्गोत्रः कालिन्दी-प्रेमपूरकः॥ ६॥
गोपस्वामी गोकुलेन्द्रो गोवर्धनवरप्रदः।
नन्दादिगोकुलत्राता दाता दारिद्र्यभञ्जनः॥ ७॥
सर्वमंगलदाता च सर्वकामप्रदायकः।
आदिकर्ता महीभर्ता सर्वसागरसिन्धुजः॥ ८॥

गजगामी गजोद्धारी कामी कामकलानिधिः।
कलंकरहितश्चन्द्रो विम्वाश्यो विम्वसत्तमः॥९॥
मालाकारः कृपाकारः कोकिलस्वरभूषणः।
रामो नीलाम्बरो देवो हली दुर्दम-मर्दनः॥१०॥
सहस्राक्षः पुरीभेत्ता महामारीविनाशनः।
शिवः शिवतमो भेत्ता वलारातिप्रपूजकः॥११॥
कुमारी-वरदायी च वरेण्यो मीनकेतनः।
नरो नारायणो धीरो राधापतिरूदारधीः॥१२॥
श्रीपतिः श्रीनिधिः श्रीमान् मापतिः प्रतिराजहा।
वृन्दापतिः कुलग्रामी धामी ब्रह्म सनातनः॥१३॥
रेवतीरमणो रामश्चञ्चलश्चारूलोचनः।
रामायण-शरीरोऽयं रामी रामः श्रियः पतिः॥१४॥
शर्वरः सर्वरी सर्वः सर्वत्र शुभदायकः।
राधा-राधायितो राधी राधाचित्त-प्रमोदकः॥१५॥
राधारतिसुखोपेतो राधामोहनतत्परः।
राधावशीकरो राधाहृदयाम्भोजषट् पदः॥१६॥
राधालिंगनसंमोहो राधानर्तनकौतुकः।
राधासंजातसंप्रीती राधाकामफलप्रदः॥१७॥
वृन्दापतिः कोशनिधिः कोकशोकविनाशकः।
चन्द्रापतिश्चन्द्रपतिश्चण्ड-कोदण्डभञ्जनः॥१८॥

vṛndāpatiḥ kośanidhiḥ koka-śoka-vināśakaḥ|
candrā-patiś-candrapatiś-caṇḍa-kodaṇḍa-bhañjanaḥ||18||

रामो दाशरथी रामो भृगुवंशसमुद्भवः।
आत्मारामो जितक्रोधो मोहो मोहान्धभञ्जनः॥१९॥

rāmo dāśarathī rāmo bhṛguvaṁśa-samudbhavaḥ|
ātmārāmo jitakrodho moho mohāndha-bhañjanaḥ||19||

वृषभानुर्भवो भावः काश्यपिः करूणानिधिः।
कोलाहलो हली हाली हेलिः हलधरप्रियः॥२०॥

vṛṣabhānur-bhavo bhāvaḥ kāśyapiḥ karūṇā-nidhiḥ|
kolāhalo halī hālī heliḥ hala-dhara-priyaḥ||20||

राधामुखाव्जमार्तण्डो भास्करो रविजो विधुः।
विधिर्विधाता वरूणो वारूणो वारूणीप्रियः॥२१॥

rādhā-mukhāvja-mārtaṇḍo bhāskaro ravijo vidhuḥ|
vidhir-vidhātā varūṇo vārūṇo vārūṇīpriyaḥ||21||

रोहिणीहृदयानन्दी वसुदेवात्मजो वली।
नीलाम्बरो रौहिणेयो जरासन्धवधोऽमलः॥२२॥

rohiṇī-hṛdayānandī vasudev-ātmajo valī|
nīlāmbaro rauhiṇeyo jarāsandha-vadho'malaḥ||22||

नागो नवाम्भो विरूदो वीरहा वरदो वली।
गोपथो विजयी विद्वान् शिपिविष्टः सनातनः॥२३॥

nāgo navāmbho virūdo vīrahā varado valī|
gopatho vijayī vidvān śipiviṣṭaḥ sanātanaḥ||23||

पर्शुरामवचोग्राही वरग्राही श्रृगालहा।
दमघोषोपदेष्टा च रथग्राही सुदर्शनः॥२४॥

Parśurāma-vacogrāhī varagrāhī śṛgālahā|
damaghoṣopadeṣṭā ca rathagrāhī sudarśanaḥ||24||

वीरपत्नी यशस्त्राता जराव्याधिविघातकः।

द्वारकावासतत्वज्ञो हुताशनवरप्रदः॥२५॥

vīrapatnī yaśastrātā jarāvyādhi-vighātakaḥ|
dvārakāvāsa-tatvajño hutāśana-varapradaḥ||25||

यमुनावेगसंहारी नीलाम्वरधरः प्रभुः।

विभुः शरासनो धन्वी गणेशो गणनायकः॥२६॥

yamunāvega-saṁhārī nīlāmvara-dharaḥ prabhuḥ|
vibhuḥ śarāsano dhanvī gaṇeśo gaṇanāyakaḥ||26||

लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः।

वामनो वामनीभूतोऽवामनो वामनारूहः॥२७॥

lakṣmaṇo lakṣaṇo lakṣyo rakṣo-vaṁśa-vināśanaḥ|
vāmano vāmanībhūto'vāmano vāmanārūhaḥ||27||

यशोदानन्दनः कर्ता यमलार्जुन-मुक्तिदः।

उलूखली महामानी दामवद्धाह्वयी शमी॥२८॥

yaśodā-nandanaḥ kartā yamalārjuna-muktidaḥ|
ulūkhalī mahāmānī dāma-vaddhhvayī śamī||28||

भक्तानुकारी भगवान् केशवोऽचलधारकः।

केशिहा मधुहा मोही वृषासुरविघातकः॥२९॥

bhaktānukārī bhagavān keśavo'caladhārakaḥ|
keśihā madhuhā mohī vṛṣāsura-vighātakaḥ||29||

अघासुरविनाशी च पूतनामोक्षदायकः।

कुब्जाविनोदी भगवान् कंसमृत्युर्महामखी॥३०॥

aghāsura-vināśī ca pūtanā-mokṣa-dāyakaḥ|
kuvjā-vinodī bhagavān kaṁsa-mṛtyur-mahāmakhī||30||

अश्वमेधो वाजपेयो गोमेधो नरमेधवान्।

कन्दर्पकोटिलावण्य-श्चन्द्रकोटिसुशीतलः॥ ३१॥

aśvamedho vājapeyo gomedho nara-medhavān|
kandarpa-koṭilāvaṇya-ścandra-koṭi-suśītalaḥ||31||

रविकोटि-प्रतीकाशो वायुकोटि-महावलः।

ब्रह्मा ब्रह्माण्डकर्ता च कमलावाञ्छितप्रदः॥ ३२॥

ravikoṭi-pratīkāśo vāyukoṭi-mahāvalaḥ|
brahmā brahmāṇḍa-kartā ca kamalā-vāñchita-pradaḥ||32||

कमली कमलाक्षश्च कमला-मुखलोलुपः।

कमलाव्रतधरी च कमलाभः पुरन्दरः॥ ३३॥

kamalī kamalākṣaśca kamalā-mukhalolupaḥ|
kamalā-vratadharī ca kamalābhaḥ purandaraḥ||33||

सौभाग्याधिकचित्तोऽयं महामायी महोत्कटः।

तारकारिः सुरत्राता मारीच-क्षोभकारकः॥ ३४॥

saubhāgyādhika-citto'yaṁ mahāmāyī mahotkaṭaḥ|
tārakāriḥ suratrātā mārīca-kṣobhakārakaḥ||34||

विश्वामित्रोप्रियो दान्तो रामो राजीवलोचनः।

लंकाधिपकुलध्वंसी विभीषणवरप्रदः॥ ३५॥

viśvāmitro-priyo dānto rāmo rājīva-locanaḥ|
laṁkādhipa-kula-dhvaṁsī vibhīṣaṇa-varapradaḥ||35||

सीतानन्दकरो रामो वीरो वारिधिवन्धनः।

खरदूषणसंहारी साकेतपुरवासनः॥ ३६॥

sītānandakaro rāmo vīro vāridhi-vandhanaḥ|
khara-dūṣaṇa-saṁhārī sāketa-puravāsanaḥ||36||

चन्द्रावलीपतिः कूलः केशी-कंसवधोऽमरः।
माधवो मधुहा माध्वी माध्वीको माधवो मधुः ॥ ३७ ॥
candrāvalīpatiḥ kūlaḥ keśī-kaṁsavadho'maraḥ|
mādhavo madhuhā mādhvī mādhvīko mādhavo madhuḥ||37||

मुञ्जाटवीगाहमानो धेनुकारिर्धरात्मजः।
वंशीवटविहारी च गोवर्धनवनाश्रयः ॥ ३८ ॥
muñjāṭavīgāhamāno dhenukārir-dharātmajaḥ|
vaṁśīvaṭa-vihārī ca govardhana-vanāśrayaḥ||38||

तथा तालवनोद्देशी भाण्डीरवनशंखहा।
तृणावर्तकथकारी वृषभानुसुतापतिः ॥ ३९ ॥
tathā tālavanoddeśī bhāṇḍīra-vana-śaṁkhahā|
tṛṇāvarta-kathakārī vṛṣabhānu-sutāpatiḥ||39||

राधाप्राणसमो राधावदनाब्जमधुव्रतः।
गोपीरञ्जनदैवज्ञो लीलाकमलपूजितः ॥ ४० ॥
rādhā-prāṇa-samo rādhā-vadanāvja-madhuvrataḥ|
gopīrañjana-daivajño līlā-kamala-pūjitaḥ||40||

क्रीड़ाकमलसन्दोहो गोपिकाप्रीतिरञ्जनः ॥
रञ्जको रञ्जनो रंगो रंगो रंगमहीरूहः ॥ ४१ ॥
krīṛā-kamala-sandoho gopikā-prīti-rañjanaḥ||
rañjako rañjano raṁgo raṁgo raṁga-mahīrūhaḥ||41||

कामः कामारिभक्तोऽयं पुराणपुरूषः कविः।
नारदो देवलो भीमो वालो वालमुखाम्बुजः ॥ ४२ ॥
kāmaḥ kāmāri-bhakto'yaṁ purāṇa-purūṣaḥ kaviḥ|
nārado devalo bhīmo vālo vālamukhāmbujaḥ||42||

अम्बुजो ब्रह्मसाक्षी च योगी दत्तवरो मुनिः।
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः॥४३॥
ambujo brahmasākṣī ca yogī dattavaro muniḥ|
ṛṣabhaḥ parvato grāmo nadī-pavana-vallabhaḥ||43||

पद्मनाभः सुरज्येष्ठो ब्रह्मा रूद्रोऽहिभूषितः।
गणानां त्राणकर्ता च गणेशो ग्रहिलो ग्रही॥४४॥
padma-nābhaḥ surajyeṣṭho brahmā rūdro'hi-bhūṣitaḥ|
gaṇānāṁ trāṇakartā ca gaṇeśo grahilo grahī||44||

गणाश्रयो गणाध्यक्षः क्रोड़ीकृतजगत्रयः।
यादवेन्द्रो द्वारकेन्द्रो मथुरावल्लभो धुरी॥४५॥
gaṇāśrayo gaṇādhyakṣaḥ kroṛīkṛta-jagatrayaḥ|
yādavendro dvārakendro mathurāvallabho dhurī||45||

भ्रमरः कुन्तली कुन्ती-सुतरक्षी महामखी।
यमुनावरदाता च काश्यपस्य वरप्रदः॥४६॥
bhramaraḥ kuntalī kuntī-sutarakṣī mahāmakhī|
yamunā-varadātā ca kāśyapasya varapradaḥ||46||

शंखचूड़वधोद्दामो गोपीरक्षणतत्परः।
पाञ्चजन्यकरो रामी त्रिरामी वनजो जयः॥४७॥
śaṁkhacūṛa-vadhoddāmo gopī-rakṣaṇa-tatparaḥ|
pāñcajanyakaro rāmī trirāmī vanajo jayaḥ||47||

फाल्गुनः फाल्गुनसखो विराधवधकारकः।
रुक्मिणीप्राणनाथश्च सत्यभामाप्रियङ्करः॥४८॥
phālgunaḥ phālgunasakho virādha-vadha-kārakaḥ|
rukmiṇī-prāṇanāthaśca satyabhāmā-priyaṅkaraḥ||48||

कल्पवृक्षो महावृक्षो दानवृक्षो महाफलः।
अङ्कुशो भूसुरो भामो भामको भ्रामको हरिः॥४९॥
kalpavṛkṣo mahāvṛkṣo dānavṛkṣo mahāphalaḥ|
aṅkuśo bhūsuro bhāmo bhāmako bhrāmako hariḥ||49||

सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः।
प्रद्युम्नो वल कर्ता च प्रहर्ता दैत्यहा प्राभुः॥५०॥
saralaḥ śāśvato vīro yaduvaṁśī śivātmakaḥ|
pradyumno vala kartā ca prahartā daityahā prābhuḥ||50||

महाधनो महावीरो वनमाला-विभूषणः।
तुलसीदामशोभाढ्यो जालन्धरविनाशनः॥५१॥
mahādhano mahāvīro vanamālā-vibhūṣaṇaḥ|
tulasīdāma-śobhāḍhyo jālandhara-vināśanaḥ||51||

शूरः सूर्यो मृकण्डश्च भास्करो विश्वपूजितः।
रविस्तमोहा वह्निश्च वाड़वो वड़वानलः॥५२॥
śūraḥ sūryo mṛkaṇḍaśca bhāskaro viśvapūjitaḥ|
ravis-tamohā vahniśca vāṛavo vaṛavānalaḥ||52||

दैत्यदर्पविनाशी च गरुड़ो गरुड़ाग्रजः।
गोपीनाथो महीनाथो वृन्दानाथोऽवरोधकः॥५३॥
daitya-darpa-vināśī ca garuṛo garuṛāgrajaḥ|
gopīnātho mahīnātho vṛndānātho'varodhakaḥ||53||

प्रपञ्ची पञ्चरूपश्च लतागुल्मश्च गोपतिः।
गंगा च यमुनारूपो गोदा वेत्रवती तथा॥५४॥
prapañcī pañcarūpaśca latāgulmaśca gopatiḥ|
gaṁgā ca yamunārūpo godā vetravatī tathā||54||

कावेरी नर्मादा तापी गण्डकी सरयुस्तथा।
राजसस्तामसः सत्त्वी सर्वाङ्गी सर्वलोचनः॥५५॥
kāverī narmādā tāpī gaṇḍakī sarayus-tathā|
rājasas-tāmasaḥ sattvī sarvāṅgī sarvalocanaḥ||55||

सुधामयोऽमृतमयो योगिनीवल्लभः शिवः।
बुद्धो बुद्धिमतां श्रेष्ठो विष्णुर्जिष्णुः शचीपतिः॥५६॥
sudhāmayo'mṛtamayo yoginīvallabhaḥ śivaḥ|
buddho buddhimatāṁ śreṣṭho viṣṇur-jiṣṇuḥ śacīpatiḥ||56||

वंशी वंशधरो लोको विलोको मोहनाशनः।
रवरावो रवोरावो बालो बालबलाहकः॥५७॥
vaṁśī vaṁśadharo loko viloko moha-nāśanaḥ|
ravarāvo ravorāvo bālo bāla-balāhakaḥ||57||

शिवो रुद्रो नलो नीलो लाङ्गुली लाङ्गुलाश्रयः।
पारदः पावनो हंसो हंसारूढो जगत्पतिः॥५८॥
śivo rudro nalo nīlo lāṅgulī lāṅgulāśrayaḥ|
pāradaḥ pāvano haṁso haṁsārūṛho jagatpatiḥ||58||

मोहिनीमोहनो मायी महामायी महामखी।
वृषो वृषाकपिः कालः कालीदमनकारकः॥५९॥
mohinī-mohano māyī mahāmāyī mahāmakhī|
vṛṣo vṛṣākapiḥ kālaḥ kālīdamana-kārakaḥ||59||

कुब्जाभाग्यप्रदो वीरो रजकक्षयकारकः।
कोमलो वरुणो राजा जलजो जलधारकः॥६०॥
kubjā-bhāgya-prado vīro rajaka-kṣaya-kārakaḥ|
komalo varuṇo rājā jalajo jaladhārakaḥ||60||

हारकः सर्वपापघ्नः परमेष्ठी पितामहः।

खड्गधारी कृपाकारी राधारमणसुन्दरः ॥ ६१ ॥
hārakaḥ sarva-pāpaghnaḥ parameṣṭhī pitāmahaḥ|
khaḍga-dhārī kṛpākārī rādhā-ramaṇa-sundaraḥ||61||

द्वादशारण्यसंभोगी शेषनागफणालयः।
कामः श्यामः सुखः श्रीदः श्रीपतिः श्रीनिधिः कृतिः ॥ ६२ ॥
dvādaśāraṇya-sambhogī śeṣa-nāga-phaṇālayaḥ|
kāmaḥ śyāmaḥ sukhaḥ śrīdaḥ śrīpatiḥ śrīnidhiḥ kṛtiḥ||62||

हरिर्हरो नरो नारो नरोत्तम इषुप्रियः।
गोपाली चित्तहर्ता च कर्ता संसारतारकः ॥ ६३ ॥
harirharo naro nāro narottama iṣupriyaḥ|
gopālī cittahartā ca kartā saṁsāra-tārakaḥ||63||

आदिदेवो महादेवो गौरीगुरुरनाश्रयः।
साधुर्मधुर्विधुर्धाता भ्राताक्रूरपरायणः ॥ । ६४ ॥
ādidevo mahādevo gaurīgururanāśrayaḥ|
sādhur-madhur-vidhur-dhātā bhrātākrūra-parāyaṇaḥ|||64||

रोलम्बी च हयग्रीवो वानरारिर्वनाश्रयः।
वनं वनी वनाध्यक्षो महावन्द्यो महामुनिः ॥ ६५ ॥
rolambī ca hayagrīvo vānarārir-vanāśrayaḥ|
vanaṁ vanī vanādhyakṣo mahāvandyo mahāmuniḥ||65||

स्यमन्तकमणिप्राज्ञो विज्ञो विघ्नविघातकः।
गोवर्धनो वर्धनीयो वर्धणी वर्धनप्रियः ॥ ६६ ॥
syamantaka-maṇiprājño vijño vighna-vighātakaḥ|
govardhano vardhanīyo vardhaṇī vardhana-priyaḥ||66||

वर्धन्यो वर्धनो वर्धी वार्धन्यः सुमुखप्रियः।

वर्धितो वृद्धको वृद्धो वृन्दारकजनप्रियः ॥ ६७ ॥

vardhanyo vardhano vardhī vārdhanyaḥ sumukha-priyaḥ|
vardhito vṛddhako vṛddho vṛndāraka-janapriyaḥ||67||

गोपालरमणीभर्ता साम्बकुष्ठविनाशनः।

रुक्मिणीहरणः प्रेमप्रेमी चन्द्रावलीपतिः ॥ ६८ ॥

gopāla-ramaṇī-bhartā sāmba-kuṣṭha-vināśanaḥ|
rukmiṇī-haraṇaḥ prema-premī candrāvalīpatiḥ||68||

श्रीकर्ता विश्वभर्ता च नरो नारायणो वली।

गणो गणपतिश्चैव दत्तात्रेयो महामुनिः ॥ ६९ ॥

śrīkartā viśvabhartā ca naro nārāyaṇo valī|
gaṇo gaṇapatiś-caiva dattātreyo mahāmuniḥ||69||

व्यासो नारायणो दिव्यो भव्यो भावुकधारकः।

स्वः श्रेयसं शिवं भद्रं भावुकं भावुकं शुभम् ॥ ७० ॥

vyāso nārāyaṇo divyo bhavyo bhāvuka-dhārakaḥ|
svaḥ śreyasaṁ śivaṁ bhadraṁ bhāvukaṁ bhāvukaṁ śubham||70||

शुभात्मकः शुभः शास्ता प्रशास्ता मेघनादहा।

ब्रह्मण्यदेवो दीनानामुद्धार-करणक्षमः ॥ ७१ ॥

śubhātmakaḥ śubhaḥ śāstā praśāstā meghanādahā|
brahmaṇyadevo dīnānām-uddhāra-karaṇa-kṣamaḥ||71||

कृष्णः कमलपत्राक्षः कृष्णः कमललोचनः।

कृष्णः कामी सदाकृष्णः समस्तप्रियकारकः ॥ ७२ ॥

kṛṣṇaḥ kamala-patrākṣaḥ kṛṣṇaḥ kamala-locanaḥ|
kṛṣṇaḥ kāmī sadākṛṣṇaḥ samasta-priya-kārakaḥ||72||

नन्दो नन्दी महानन्दी मादी मादनकः किली।

मिली हिलि गिली गोली गोलो गोलालयो गुली ॥ ७३ ॥

nando nandī mahānandī mādī mādanakaḥ kilīl
milī hili gilī golī golo golālayo gulī||73||

गुग्गुली मारकी शाखी वटः पिप्पलकः कृती।

म्लेच्छहा कालहर्ता च यशोदा यश एव च॥७४॥

guggulī mārakī śākhī vaṭaḥ pippalakaḥ kṛtī|
mlecchahā kālahartā ca yaśodā yaśa eava ca ||74||

अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्दनः।

हंसो नारायणो लीलो नीलो भक्तिपरायणः॥७५॥

acyutaḥ keśavo viṣṇur-hariḥ satyo janārdanaḥ|
haṁso nārāyaṇo līlo nīlo bhakti-parāyaṇaḥ||75||

जानकीवल्लभो रामो विरामो विघ्ननाशनः।

सहस्रांशुर्महाभानु र्वीरवाहुर्महोदधिः॥७६॥

jānakī-vallabho rāmo virāmo vighna-nāśanaḥ|
sahasrāṁśur-mahābhānu rvīravāhur-mahodadhiḥ||76||

समुद्रोऽब्धिरकुपारः पारावारः सरित्पतिः।

गोकुलानन्दकारी च प्रतिज्ञा-परिपालकः॥७७॥

samudro'vdhir-akupāraḥ pārāvāraḥ saritpatiḥ|
gokulānandakārī ca pratijñā-paripālakaḥ||77||

सदारामः कृपारामो महारामो धनुर्धरः।

पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः॥७८॥

sadā-rāmaḥ kṛpā-rāmo mahā-rāmo dhanur-dharaḥ|
parvataḥ parvatākāro gayo geyo dvijapriyaḥ||78||

कम्वलाश्वतरो रामो रामायणप्रवर्तकः।

द्योर्दिवो दिवसो दिव्यो भव्यो भाविभयापहः॥७९॥

kamvalāśvataro rāmo rāmāyaṇa-pravartakaḥ|
dyor-divo divaso divyo bhavyo bhāvi-bhayāpahaḥ||79||

पार्वतीभाग्यसहितो भ्राता लक्ष्मीविलासवान्।
विलासी साहसी सर्वी गर्वी गर्वितलोचनः ॥८०॥

pārvatī-bhāgya-sahito bhrātā lakṣmī-vilāsavān|
vilāsī sāhasī sarvī garvī garvita-locanaḥ||80||

मुरारिर्लोकधर्मज्ञो जीवनो जीवनान्तकः।
यमो यमादिर्यमनो यामी यामविधायकः ॥८१॥

murārir-loka-dharmajño jīvano jīvanāntakaḥ|
yamo yamādir-yamano yāmī yāma-vidhāyakaḥ||81||

वंसुली पांसुली पांसुः पाण्डुरर्जुनवल्लभः।
ललिताचन्द्रिकामाली माली मालाम्बुजाश्रयः ॥८२॥

vaṁsulī pāṁsulī pāṁsuḥ pāṇḍur-arjuna-vallabhaḥ|
lalitā-candrikā-mālī mālī mālāmbujāśrayaḥ||82||

अम्बुजाक्षो महायक्षो दक्षश्चिन्तामणिः प्रभुः।
मणिर्दिनमणिश्चैव केदारो वदरीश्रयः ॥८३॥

ambujākṣo mahāyakṣo dakṣaś-cintāmaṇiḥ prabhuḥ|
maṇir-dinamaṇiś-caiva kedāro vadarīśrayaḥ||83||

बदरीवनसंप्रीतो व्यासः सत्यवतीसुतः।
अमरारिनिहन्ता च सुधासिन्धुविधूदयः ॥८४॥

badarī-vana-saṁprīto vyāsaḥ satyavatī-sutaḥ|
amarāri-nihantā ca sudhāsindhuvidhūdayaḥ||84||

चन्द्रो रविः शिवः शूली चक्री चैव गदाधरः।
श्रीकर्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥८५॥

candro raviḥ śivaḥ śūlī cakrī caiva gadādharaḥ|
śrīkartā śrīpatiḥ śrīdaḥ śrīdevo devakīsutaḥ||85||

श्रीपतिः पुण्डरीकाक्षः पद्मनाभो जगत्पतिः।
वासुदेवोऽप्रमेयात्मा केशवो गरुडध्वजः॥८६॥
śrīpatiḥ puṇḍarīkākṣaḥ padmanābho jagatpatiḥ|
vāsudevo'prameyātmā keśavo garuḍa-dhvajaḥ||86||

नारयणः परं धाम देवदेवो महेश्वरः।
चक्रपाणिः कलापूर्णो वेदवेद्यो दयानिधिः॥८७॥
nārayaṇaḥ paraṁ dhāma devadevo maheśvaraḥ|
cakrapāṇiḥ kalāpūrṇo vedavedyo dayānidhiḥ||87||

भगवान् सर्वभूतेशो गोपालः सर्वपालकः।
अनन्तो निर्गुणोऽनन्तो निर्विकल्पो निरञ्जनः॥८८॥
bhagavān sarvabhūteśo gopālaḥ sarvapālakaḥ|
ananto nirguṇo'nanto nirvikalpo nirañjanaḥ||88||

निराधारो निराकारो निराभासो निराश्रयः।
पुरुषः प्रणवातीतो मुकुन्दः परमेश्वरः॥८९॥
nirādhāro nirākāro nirābhāso nirāśrayaḥ|
puruṣaḥ praṇavātīto mukundaḥ parameśvaraḥ||89||

क्षणावनिः सार्वभौमो वैकुण्ठो भक्तवत्सलः।
विष्णुर्दामोदरः कृष्णो माधवो मथुरापतिः॥९०॥
kṣaṇāvaniḥ sārvabhaumo vaikuṇṭho bhaktavatsalaḥ|
viṣṇur-dāmodaraḥ kṛṣṇo mādhavo mathurāpatiḥ||90||

देवकीगर्भसम्भूतो यशोदावत्सलो हरिः।
शिवः सङ्कर्षणः शम्भुर्भूतनाथो दिवस्पतिः॥९१॥
devakī-garbha-sambhūto yaśodā-vatsalo hariḥ|
śivaḥ saṅkarṣaṇaḥ śambhur-bhūtanātho divaspatiḥ||91||

अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः।
निर्वाणनायको नित्यो नीलजीमूतसन्निभः॥९२॥
avyayaḥ sarva-dharmajño nirmalo nirupadravaḥ|
nirvāṇa-nāyako nityo nīlajīmūta-sannibhaḥ||92||

कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः।
हृषीकेशः पीतवासा वसुदेवप्रियात्मजः॥९३॥
kalā-kṣayaśca sarvajñaḥ kamalā-rūpa-tatparaḥ|
hṛṣīkeśaḥ pītavāsā vasudeva-priyātmajaḥ||93||

नन्दगोपकुमारर्यो नवनीताशनः प्रभुः।
पुराणपुरुषः श्रेष्ठः सङ्खपाणिः सुविक्रमः॥९४॥
nanda-gopa-kumārāryo navanītāśanaḥ prabhuḥ|
purāṇa-puruṣaḥ śreṣṭhaḥ saṅkhapāṇiḥ suvikramaḥ||94||

अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः।
गदाधरः सुरार्तिघ्नो गोविन्दो नन्दकायुधः॥९५॥
aniruddhaścakrarathaḥ śārṅgapāṇiścaturbhujaḥ|
gadādharaḥ surārtighno govindo nandakāyudhaḥ||95||

वृन्दावनचरः शौरिर्वेणुवाद्यविशारदः।
तृणावर्तान्तको भीमो साहसो वहुविक्रमः॥९६॥
vṛndāvana-caraḥ śaurir-veṇu-vādya-viśāradaḥ|
tṛṇāvartāntako bhīmo sāhaso vahu-vikramaḥ||96||

शकटासुरसंहारी वकासुरविनाशनः।
धेनुकासुरसंघाती पूतनारिर्नृकेसरी॥९७॥
śakaṭā-sura-saṁhārī vakāsura-vināśanaḥ|
dhenukāsura-saṁghātī pūtanārir-nṛkesarī||97||

पितामहो गुरुः साक्षी प्रत्यगात्मा सदाशिवः।

अप्रमेयप्रभुः प्राज्ञोऽप्रतर्क्यःस्वप्नवर्धनः॥९८॥

pitāmaho guruḥ sākṣī pratyagātmā sadāśivaḥ|
aprameya-prabhuḥ prājño'pratarkyaḥ-svapna-vardhanaḥ||98||

धन्यो मान्यो भवो भावो धीरः शान्तो जगद्गुरुः।

अन्तर्यामीश्वरो दिव्यो दैवज्ञो देवतागुरुः॥९९॥

dhanyo mānyo bhavo bhāvo dhīraḥ śānto jagad-guruḥ|
antaryāmī-śvaro divyo daivajño devatā-guruḥ||99||

क्षीराब्धिशयनो धाता लक्ष्मीवान् लक्ष्मणाग्रजः।

धात्रीपतिरमेयात्मा चन्द्रशेखरपूजितः॥१००॥

kṣīrāvdhi-śayano dhātā lakṣmīvān lakṣmaṇāgrajaḥ|
dhātrī-patir-ameyātmā candraśekhara-pūjitaḥ||100||

लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः।

कोटिमन्मथसौन्दर्यो जगन्मोहनविग्रहः॥१०१॥

lokasākṣī jagaccakṣuḥ puṇya-cāritra-kīrtanaḥ|
koṭi-manmatha-saundaryo jagan-mohana-vigrahaḥ||101||

मन्दस्मिततमो गोपो गोपिकापरिवेष्टितः।

फुल्लारविन्दनयनश्चाणुरन्ध्रनिसूदनः॥१०२॥

manda-smita-tamo gopo gopikā-pariveṣṭitaḥ|
phullāravinda-nayanaś-cāṇurandhra-nisūdanaḥ||102||

इन्दीबरदलश्यामो वर्हि-वर्हावतंसकः।

मुरलीनिनदाह्लादो दिव्यमाल्यो वराश्रयः॥१०३॥

indībara-dala-śyāmo varhi-varhāvataṁsakaḥ|
muralī-ninadāhlādo divyamālyo varāśrayaḥ||103||

सुकपोलयुगः सुभ्रूर्युगलः सुललाटकः।
कम्बुग्रीवो विशालाक्षो लक्ष्मीवान् शुभलक्षणः।१०४॥
sukapola-yugaḥ subhrūr-yugalaḥ sulalāṭakaḥ|
kambugrīvo viśālākṣo lakṣmīvān śubhalakṣaṇaḥ|104||

पीनवक्षाश्चतुर्वाहुश्चतुर्मूर्तिस्त्रिविक्रमः।
कलंकरहितः शुद्धो दुष्टशत्रुनिबर्हणः॥१०५॥
pīna-vakṣāś-caturvāhuś-caturmūrtis-trivikramaḥ|
kalaṁka-rahitaḥ śuddho duṣṭa-śatru-nibarhaṇaḥ||105||

किरीटकुण्डलधरः कटकाङ्गदमण्डितः।
मुद्रिकाभरणोपेतः कटिसूत्रविराजितः॥१०६॥
kirīṭa-kuṇḍala-dharaḥ kaṭakāṅgada-maṇḍitaḥ|
mudrikā-bharaṇopetaḥ kaṭisūtra-virājitaḥ||106||

मञ्जीररञ्जितपदः सर्वाभरणभूषितः।
विन्यस्तपादयुगलो दिव्यमंगलविग्रहः॥१०७॥
mañjīra-rañjita-padaḥ sarvābharaṇa-bhūṣitaḥ|
vinyasta-pādayugalo divya-maṁgala-vigrahaḥ||107||

गोपिकानयनानन्दः पूर्णचन्द्रनिभाननः।
समस्तनयनानन्दः सुन्दरो लोकनन्दनः॥१०८॥
gopikā-nayanānandaḥ pūrṇa-candra-nibhānanaḥ|
samasta-nayanānandaḥ sundaro loka-nandanaḥ||108||

यमुनातीरसञ्चारी राधामन्मथवैभवः।
गोपनारीप्रियो दान्तो गोपीवस्त्रापहारकः॥१०९॥
yamunātīra-sañcārī rādhā-manmatha-vaibhavaḥ|
gopanārī-priyo dānto gopī-vastrāpahārakaḥ||109||

शृङ्गारमूर्तिः श्रीधामो तारको मूलकारणम्।

सृष्टिसंरक्षणोपायः क्रूराशुरविभञ्जनः॥ ११०॥

śṛṅgāra-mūrtiḥ śrīdhāmo tārako mūla-kāraṇam|
sṛṣṭi-saṁrakṣaṇopāyaḥ krūrāśura-vibhañjanaḥ||110||

नरकासुर-हारी च मुरारिर्वैरिमर्दनः।

आदितेयप्रियो दैत्यभीकरश्चेन्दुशेखरः॥ १११॥

narakāsura-hārī ca murārir-vairi-mardanaḥ|
āditeya-priyo daitya-bhīkaraś-cenduśekharaḥ||111||

जरासन्धकुलध्वंसी कंसारातिः सुविक्रमः।

पुण्यश्लोकः कीर्तनीयो यादवेन्द्रो जगन्नुतः॥ ११२॥

jarāsandha-kula-dhvaṁsī kaṁsārātiḥ suvikramaḥ|
puṇyaślokaḥ kīrtanīyo yādavendro jagannutaḥ||112||

रुक्मिणीरमणः सत्यभामा-जाम्वबतीप्रियः।

मित्रविन्दा-नाग्नजिती-लक्ष्मणा-समुपासितः॥ ११३॥

rukmiṇī-ramaṇaḥ satyabhāmā-jāmvabatī-priyaḥ|
mitravindā-nāgnajitī-lakṣmaṇā-samupāsitaḥ||113||

सुधाकरकुले जातोऽनन्तप्रवलविक्रमः।

सर्वसौभाग्य-सम्पन्नो द्वारकायामुपस्थितः॥ ११४॥

sudhākarakule jāto'nanta-pravala-vikramaḥ|
sarva-saubhāgya-sampanno dvārakāyām-upasthitaḥ||114||

भद्रा सूर्य सुतानाथो लीलामानुषविग्रहः।

सहस्रषोड़श-स्त्रीशो भोगमोक्षैकदायकः॥ ११५॥

bhadrā sūrya sutānātho līlā-mānuṣa-vigrahaḥ|
sahasra-ṣoṛaśa-strīśo bhoga-mokṣaika-dāyakaḥ||115||

वेदान्तवेद्यः संवेद्यो वेद्यो ब्रह्माण्डनायकः।

गोर्वर्धनधरो नाथः सर्वजीवदयापरः॥ ११६॥

vedānta-vedyaḥ saṁvedyo vedyo brahmāṇḍa-nāyakaḥ|
gorvardhana-dharo nāthaḥ sarva-jīva-dayāparaḥ||116||

मूर्तिमान् सर्वभूतात्मा आर्तत्राणपरायणः।

सर्वज्ञः सर्वसुलभः सर्वशास्त्रविशारदः॥ ११७॥

mūrtimān sarvabhūtātmā ārtatrāṇa-parāyaṇaḥ|
sarvajñaḥ sarva-sulabhaḥ sarva-śāstra-viśāradaḥ||117||

षड्गुणैश्वर्यसम्पन्नः पूर्णकामो धुरन्धरः।

महानुभवः कैवल्यदायको लोकनायकः॥ ११८॥

ṣaḍguṇa-iśvarya-sampannaḥ pūrṇakāmo dhurandharaḥ|
mahānubhavaḥ kaivalya-dāyako lokanāyakaḥ||118||

आदिमध्यान्तरहितः सुद्धसात्त्विकविग्रहः।

असमानसमस्तात्मा शरणागतवत्सलः॥ ११९॥

ādi-madhyānta-rahitaḥ suddha-sāttvika-vigrahaḥ|
asamāna-samastātmā śaraṇāgata-vatsalaḥ||119||

उत्पत्तिस्थितिसंहार-कारणं सर्वकारणम्।

गम्भीरः सर्वभावज्ञः सच्चिदानन्दविग्रहः॥ १२०॥

utpatti-sthiti-saṁhāra-kāraṇaṁ sarva-kāraṇam|
gambhīraḥ sarva-bhāvajñaḥ sac-cid-ānanda-vigrahaḥ||120||

विष्वक्सेनः सत्यसन्धः सत्यवान् सत्यविक्रमः।

सत्यव्रतः सत्यसंज्ञः सर्वधर्मपरायणः॥ १२१॥

viṣvaksenaḥ satya-sandhaḥ satyavān satya-vikramaḥ|
satya-vrataḥ satya-saṁjñaḥ sarva-dharma-parāyaṇaḥ||121||

आपन्नार्तिप्रशमनो द्रौपदीमानरक्षकः।

कन्दर्पजनकः प्राज्ञो जगन्नाटकवैभवः॥ १२२॥

āpannārti-praśamano draupadī-māna-rakṣakaḥ|
kandarpa-janakaḥ prājño jagan-nāṭaka-vaibhavaḥ||122||

भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः।

दमघोष-सुतद्वेषी वाणवाहु-विखण्डनः॥ १२३॥

bhakti-vaśyo guṇātītaḥ sarvaiśvarya-pradāyakaḥ|
damaghoṣa-sutadveṣī vāṇavāhu-vikhaṇḍanaḥ||123||

भीष्मभक्तिप्रदो दिव्यः कौरवान्वयनाशनः।

कौन्तेयप्रियबन्धुश्च पार्थस्यन्दन-सारथिः॥ १२४॥

bhīṣma-bhakti-prado divyaḥ kauravānvaya-nāśanaḥ|
kaunteya-priya-bandhuśca pārtha-syandana-sārathiḥ||124||

नारसिंहो महावीरः स्तम्भजातो महावलः।

प्रह्लादवरदः सत्यो देवपूज्योऽभयङ्करः॥ १२५॥

nārasiṁho mahāvīraḥ stambha-jāto mahāvalaḥ|
prahlāda-varadaḥ satyo devapūjyo'bhayaṅkaraḥ||125||

उपेन्द्र इन्द्रावरजो वामनो वलिबन्धनः।

गजेन्द्रवरदः स्वामी सर्वदेवनमस्कृतः॥ १२६॥

upendra indrāvarajo vāmano valibandhanaḥ|
gajendra-varadaḥ svāmī sarva-deva-namaskṛtaḥ||126||

शेषपर्यङ्कशयनो वैनतेयरथो जयी।

अव्याहतवलैश्वर्यसम्पन्नः पूर्णमानसः॥ १२७॥

śeṣa-paryaṅka-śayano vainateya-ratho jayī|
avyāhata-valai-śvarya-sampannaḥ pūrṇa-mānasaḥ||127||

योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः।
योगिहृत्पङ्कजावासो योगमायासमन्वितः॥ १२८॥
yoge-śvareśvaraḥ sākṣī kṣetrajño jñāna-dāyakaḥ|
yogi-hṛtpaṅkajāvāso yogamāyā-samanvitaḥ||128||

नादविन्दु-कलातीत-श्चतुर्वर्गफलप्रदः।
सुषुम्नामार्गसञ्चारी देहश्यान्तर-संस्थितः॥ १२९॥
nādavindu-kalātīta-ścaturvarga-phalapradaḥ|
suṣumnā-mārgasañcāirī dehaśyāntara-saṁsthitaḥ||129||

देहेन्द्रियमनः-प्राणसाक्षी चेतः-प्रसादकः।
सूक्ष्मः सर्वगतो देही ज्ञानदर्पण-गोचरः॥ १३०॥
dehendriya-manaḥ-prāṇa-sākṣī cetaḥ-prasādakaḥ|
sūkṣmaḥ sarvagato dehī jñāna-darpaṇa-gocaraḥ||130||

तत्त्वत्रयात्मकोऽव्यक्तः कुण्डली समुपाश्रितः।
ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः॥ १३१॥
tattva-trayātmako'vyaktaḥ kuṇḍalī samupāśritaḥ|
brahmaṇyaḥ sarva-dharmajñaḥ śānto dānto gataklamaḥ||131||

श्रीनिवासः सदानन्दी विश्वमूर्तिर्माहाप्रभुः।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ १३२॥
śrīnivāsaḥ sadānandī viśvamūrtir-māhāprabhuḥ|
sahasraśīrṣā puruṣaḥ sahasrākṣaḥ sahasrapāt||132||

समस्तभुवनाधारः समस्तप्राणरक्षकः।
समस्तसर्वभावज्ञो गोपिकाप्राणबल्लभः॥ १३३॥
samasta-bhuvan-ādhāraḥ samasta-prāṇa-rakṣakaḥ|
samasta-sarva-bhāvajño gopikā-prāṇa-ballabhaḥ||133||

नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमंगलः।

व्युहार्चितो जगन्नाथः श्रीवैकुण्ठपुराधिपः॥ १३४॥

nityotsavo nitya-saukhyo nitya-śrīr-nitya-maṁgalaḥ|
vyuhārcito jagannāthaḥ śrī vaikuṇṭha-purādhipaḥ||134||

पूर्णानन्दघनीभूतो गोपरेशधरो हरिः।

कलापकुसुमश्यामः कोमलः शान्तविग्रहः॥ १३५॥

pūrṇānanda-ghanībhūto gopareśa-dharo hariḥ|
kalāpa-kusuma-śyāmaḥ komalaḥ śānta-vigrahaḥ||135||

गोपाङ्गनावृतोऽनन्तो वृन्दावनसमाश्रयः।

वेणुवादरतः श्रेष्ठो देवानां हितकारकः॥ १३६॥

gopāṅganā-vṛto'nanto vṛndāvana-samāśrayaḥ|
veṇu-vādarataḥ śreṣṭho devānāṁ hitakārakaḥ||136||

बालक्रीड़ासमासतो नवनीतस्य तस्करः।

गोपाल-कामिनीजारश्चोर जारशिखामणिः॥ १३७॥

bālakrīḍā-samāsato navanītasya taskaraḥ|
gopāla-kāminījāraś-cora jāra-śikhāmaṇiḥ||137||

परंज्योतिः पराकाशः परावासः परिस्फुटः।

अष्टादशाक्षरो मन्त्रो व्यापको लोकपावनः॥ १३८॥

paraṁ-jyotiḥ parākāśaḥ parāvāsaḥ parisphuṭaḥ|
aṣṭādaśākṣaro mantro vyāpako lokapāvanaḥ||138||

सप्तकोटि-महामन्त्र-शेखरो देवशेखरः।

विज्ञानज्ञानसन्धान-स्तेजराशिर्जगत्पतिः॥ १३९॥

saptakoṭi-mahāmantra-śekharo deva-śekharaḥ|
vijñāna-jñāna-sandhāna-stejarāśir-jagatpatiḥ||139||

भक्तलोक-प्रसनात्मा भक्तमन्दार-विग्रहः।

भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः॥ १४०॥

bhaktaloka-prasanātmā bhakta-mandāra-vigrahaḥ|
bhakta-dāridrya-damano bhaktānāṁ prīti-dāyakaḥ||140||

भक्ताधीनमनाः पूज्यो भक्तलोक-शिवङ्कर।

भक्ताभीष्टप्रदः सर्वभक्ताघौघ-निकृन्तनः॥ १४१॥

bhaktādhīnamanāḥ pūjyo bhaktaloka-śivaṅkara|
bhaktābhīṣṭa-pradaḥ sarva-bhaktāghaugha-nikṛntanaḥ||141||

अपारकरुणासिन्धुर्भगवान् भक्ततत्परः॥ १४२॥

apāra-karuṇā-sindhur-bhagavān bhakta-tatparaḥ||142||

अथ फलश्रुतिः।

इति श्रीराधिकानाथ-सहस्रनाम कीर्तितम्।

स्मरणत् पापराशीनां खण्डनं मृत्युनाशनम्॥ १॥

atha phalaśrutiḥ|
iti śrī rādhikā-nātha-sahasra-nāma kīrtitam|
smaraṇat pāparāśīnāṁ khaṇḍanaṁ mṛtyunāśanam||1||

वैष्णवानां प्रियकरं महारोगनिवारणम्।

ब्रह्महत्या सुरापानं परस्त्रीगमनं तथा॥ २॥

vaiṣṇavānāṁ priyakaraṁ mahā-roga-nivāraṇam|
brahmahatyā surāpānaṁ parastrī-gamanaṁ tathā||2||

परद्रव्यापहरणं परद्वेषसमन्वितम्।

मानसं वाचिकं कायं यत् पापं पापसम्भवम्॥ ३॥

para-dravyāpaharaṇaṁ para-dveṣa-samanvitam|
mānasaṁ vācikaṁ kāyaṁ yat pāpaṁ pāpa-sambhavam||3||

सहस्रनाम पठनात् सर्वं नश्यति तत्क्षणात्।

महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान्॥४॥

sahasranāma paṭhanāt sarvaṁ naśyati tatkṣaṇāt|
mahādāridryayukto yo vaiṣṇavo viṣṇubhaktimān||4||

कार्तिक्यां संपथेद्रात्रो शतमष्टोत्तरं क्रमात्।

पीताम्बरधरो धीमान् सुगन्धिपुष्पचन्दनैः॥५॥

kārtikyāṁ saṁpathed-rātro śatam-aṣṭottaraṁ kramāt|
pītāmbara-dharo dhīmān sugandhi-puṣpa-candanaiḥ||5||

पुस्तकं पूजयित्वा तु नैवेद्यादिभिरेव च।

राधाध्यानाङ्कितो धीरो वनमालविभूषितः॥६॥

pustakaṁ pūjayitvā tu naivedyādi-bhireva ca|
rādhā-dhyānāṅkito dhīro vanamāla-vibhūṣitaḥ||6||

शतमष्टोत्तरं देवि सठेन्नामसहस्रकम्।

चैत्रे शुक्ले च कृष्णे च कुहू-संक्रान्तिवासरे॥७॥

śatam-aṣṭottaraṁ devi saṭhen-nāma-sahasrakam|
caitre śukle ca kṛṣṇe ca kuhū-saṁkrānti-vāsare||7||

पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत् क्षणात्।

तुलसीमालया युक्तो वैष्णवो भक्तितत्परः॥८॥

paṭhitavyaṁ prayatnena trailokyaṁ mohayet kṣaṇāt|
tulasīmālayā yukto vaiṣṇavo bhaktitatparaḥ||8||

रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे।

ब्राह्मणं पूजयित्वा च भोजयित्वा विधानतः॥९॥

ravivāre ca śukre ca dvādaśyāṁ śrāddha-vāsare|
brāhmaṇaṁ pūjayitvā ca bhojayitvā vidhānataḥ||9||

पठेन्नामसहस्रं च ततः सिद्धिः प्रजायते।

महानिशायां सततं वैष्णवो यः पठेत् सदा॥१०॥

paṭhen-nāma-sahasraṁ ca tataḥ siddhiḥ prajāyate|

mahā-niśāyāṁ satataṁ vaiṣṇavo yaḥ paṭhet sadā||10||

देशान्तरगता लक्ष्मीः समायाति न संशयः।

त्रैलोक्ये च महा देवि सुन्दर्यः काममोहिताः॥ ११॥

deśāntaragatā lakṣmīḥ samāyāti na saṁśayaḥ|
trailokye ca mahā devi sundaryaḥ kāma-mohitāḥ||11||

मुग्धाः स्वयं समायान्ति वैष्णवं च भजन्ति ताः।

रोगी रोगात् प्रमुच्येत वद्धो मुच्येत वन्धनात्॥ १२॥

mugdhāḥ svayaṁ samāyānti vaiṣṇavaṁ ca bhajanti tāḥ|
rogī rogāt pramucyeta vaddho mucyeta vandhanāt||12||

गुर्विणी जनयेत् पुत्रं कन्या विन्दति सत्पतिम्।

राजानो वश्यताम् यान्ति किं पुनः क्षुद्रमानवाः॥ १३॥

gurviṇī janayet putraṁ kanyā vindati satpatim|
rājāno vaśyatām yānti kiṁ punaḥ kṣudramānavāḥ||13||

सहस्रनामश्रवणात् पठनात् पूजनात् प्रिये।

धारणात् सर्वमाप्नोति वैष्णवो नात्र संशयः॥ १४॥

sahasra-nāma-śravaṇāt paṭhanāt pūjanāt priye|
dhāraṇāt sarvam-āpnoti vaiṣṇavo nātra saṁśayaḥ||14||

वंशीवटे चान्यवटे तथा पिप्पलकेऽथवा।

कदम्वपादपतले गोपाल-मूर्ति-सन्निधौ॥ १५॥

vaṁśīvaṭe cānyavaṭe tathā pippalake'thavā|
kadamva-pādapatale gopāla-mūrti-sannidhau||15||

यः पठेद्वैष्णवो नित्यं स याति हरिमन्दिरम्।

कृष्णेनोक्तं राधिकायै मयि प्रोक्तं तया शिवे॥ १६॥

yaḥ paṭhed-vaiṣṇavo nityaṁ sa yāti hari-mandiram|
kṛṣṇenoktaṁ rādhikāyai mayi proktaṁ tayā śive||16||

नारदाय मया प्रोक्तं नारदेन प्रकाशितम्।

मया त्वयि वरारोहे प्रोक्तमेतत् सुदुर्ल्लभम्॥ १७॥

nāradāya mayā proktaṁ nāradena prakāśitam|
mayā tvayi varārohe proaktametat sudurllabham||17||

गोपनीयं प्रयत्नेन न प्रकाश्यं कथञ्चन।

शठाय पापिने चैव लम्पटाय विशेषतः॥ १८॥

gopanīyaṁ prayatnena na prakāśyaṁ kathañcana|
śaṭhāya pāpine caiva lampaṭāya viśeṣataḥ||18||

न दातव्यं न दातव्यं न दातव्यं कदाचन।

देयं शिष्याय शान्ताय विष्णुभक्तिरताय च॥ १९॥

na dātavyaṁ na dātavyaṁ na dātavyaṁ kadācana|
deyaṁ śiṣyāya śāntāya viṣṇu-bhakti-ratāya ca||19||

गोदानब्रह्मयज्ञादेर्वाजपेयशतस्य च।

अश्वमेधसहस्रस्य फलं पाठे भवेद् ध्रुवम्॥ २०॥

godāna-brahma-yajñāder-vājapeya-śatasya ca|
aśvamedha-sahasrasya phalaṁ pāṭhe bhaved dhruvam||20||

मोहनं स्तम्भनञ्चैव मारणोच्चाटनादिकम्।

यद् यद् वाञ्छति चित्तेन तत् तत् प्राप्नोति वैष्णवः॥ २१॥

mohanaṁ stambhanañcaiva māraṇoccāṭanādikam|
yad yad vāñchati cittena tat tat prāpnoti vaiṣṇavaḥ||21||

एकादश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः।

आहारं ब्राह्मणे दत्त्वा दक्षिणां स्वर्णभूषणम्॥ २२॥

ekādaśyāṁ naraḥ snātvā sugandhi-dravya-tailakaiḥ|
āhāraṁ brāhmaṇe dattvā dakṣiṇāṁ svarṇa-bhūṣaṇam||22||

तत आरम्भकर्तासौ सर्वं प्राप्नोति मानवः।

शतावृतं सहस्रञ्च यः पठेद् वैष्णवो जनः॥ २३॥

tata ārambha-kartāsau sarvaṁ prāpnoti mānavaḥ|
śatāvṛtaṁ sahasrañca yaḥ paṭhed vaiṣṇavo janaḥ||23||

श्रीवृन्दावनचन्द्रस्य प्रसादात् सर्वमाप्नुयात्।
यद्गृहे पुस्तकं देवि पूजितञ्चैव तिष्ठति॥२४॥
śrī vṛndāvana-candrasya prasādāt sarvamāpnuyāt|
yadgṛhe pustakaṁ devi pūjitañcaiva tiṣṭhati||24||

न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित्।
सर्पादिभूतयक्षाद्या नश्यन्ति नात्र संशयः॥२५॥
na mārī na ca dur-bhikṣaṁ nopasarga-bhayaṁ kvacit|
sarpādi-bhūta-yakṣādyā naśyanti nātra saṁśayaḥ||25||

श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा।
गृहे यत्र सहस्रञ्च नाम्नां तिष्ठति पूजितम्॥२६॥
gṛhe yatra sahasrañca nāmnāṁ tiṣṭhati pūjitam||26||

॥इति श्रीसंमोहनतन्त्रे पार्वतीश्वर-संवादे श्रीगोपाल-सहस्रनाम-स्तोत्रम् सम्पूर्णम्॥
||iti śrī saṁmohana-tantre pārvatīśvara-saṁvāde śrīgopāla-sahasranāma-stotram sampūrṇam||

References:
1. Srī Saṁmohana-tantra
2. Brihat Bhakti-tattva-Sāra
3. Ṣtava-kavaca Mālā
4. Srī gopāla-sahasranāma-stotram by Sri Kavindra Kumar Tarkatirtha, Howrah, Kolkata
Suggestions: madhuryakrishna@gmail.com